# .. dashAvatArastotram ..

# ॥ દશાવતારસ્તોત્રમ્ ॥

## Document Information

Text title : dashAvatArastotram

File name : dashAvatArastotra.itx

Location : doc_vishhnu

Author : vAdirAja

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : June 5, 2006, January 2, 2012

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ દશાવતારસ્તોત્રમ્ ॥

નમોઽસ્તુ નારાયણમન્દિરાય નમોઽસ્તુ હારાયણકન્ધરાય ।
નમોઽસ્તુ મત્સ્યાય લયાબ્ધિગાય નમોઽસ્તુ કૂર્માય પયોબ્ધિગાય ।
નમો વરાહાય ધરાધરાય નમો નૃસિંહાય પરાત્પરાય ॥ ૨॥

નમોઽસ્તુ શક્રાશ્રય-વામનાય નમોઽસ્તુ વિપ્રોત્સવ-ભાર્ગવાય ।
નમોઽસ્તુ સીતાહિત-રાઘવાય નમોઽસ્તુ  પાર્થસ્તુત-યાદવાય ॥ ૩ ॥

નમોઽસ્તુ બુદ્ધાય વિમોહકાય નમોઽસ્તુ તે કલ્કિ-પયોદિતાય ।
નમોઽસ્તુ પૂર્ણામિતસદ્ગુણાય સમસ્ત-નાથાય હયાનનાય ॥ ૪॥

કરસ્થ-શઙ્ખોલ્લસ-દક્ષમાલા-પ્રબોધ-મુદ્રાભય-પુસ્તકાય ।
નમોઽસ્તુ વક્ત્રોદ્ગિર-દાગમાય નિરસ્ત હેયાય હયાનનાય ॥ ૫॥

રમાસમાકાર-ચતુષ્ટયેન ક્રમાચ્ચતુર્દિક્ષુ નિષેવિતાય ।
નમોઽસ્તુ પાર્શ્વદ્વયગ-દ્વિરૂપશ્રિયાભિષિક્તાય હયાનનાય ॥ ૬॥

કિરીટ-પટ્ટાઙ્ગદ-હાર-કાઞ્ચી-સુરત્નપીતાંબર-નૂપુરાદ્યૈઃ ।
વિરાજિતાઙ્ગાય નમોઽસ્તુ તુભ્યં સુરૈઃ પરીતાય હયાનનાય ॥ ૭॥

વિદોષ-કોટીન્દુ-નિભપ્રભાય વિશેષતો મધ્વ-મુનિ-પ્રિયાય।
વિમુક્તવન્દ્યાય નમોઽસ્તુ વિશ્વગ્વિધૂત-વિઘ્નાય હયાનનાય ॥૮॥

નમોઽસ્તુ શિષ્ટેષ્ટદ વાદિરાજકૃતાષ્ટકાભિષ્ટુત-ચેષ્ટિતાય ।
દસાવતારૈ-સ્ત્રિદસાર્થદાય નિશેશ-બિંબસ્થ હયાનનાય ॥ ૯॥

નમોઽસ્તુ પારાયણચર્ચિતાય નમોઽસ્તુ નારાયણ્ તેઽર્ચિતાય ॥ ૧॥

॥ ઇતિ વાદિરાજપૂજ્યચરણ-વિરચિતં દશાવતારસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by N.Balasubramanian bbalu at satyam.net.in

.. dashAvatArastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*